International Journal of Sanskrit Research 2021; 7(5): 89-90

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(5): 89-90
© 2021 IJSR
www.anantaajournal.com
Received: 03-07-2021
Accepted: 28-08-2021

**Saroj Mahananda**
Research Scholar, Department of Sanskrit, Utkal University, Vani Vihar, Bhubaneswar, Odisha, India

**Corresponding Author:**
**Saroj Mahananda**
Research Scholar, Department of Sanskrit, Utkal University, Vani Vihar, Bhubaneswar, Odisha, India

# उपनिषत्सु भक्तिः

## Saroj Mahananda

## Introduction

प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इति ख्यातपूर्वा उक्तिः। अत्र प्रयोजनस्य आवश्यकता तथा च महत्वं प्राथम्येन कथनीयम्। इदं तु स्पष्टमेव यत् यद्यपि सर्वेषां कृते विषयस्यास्य आवश्यकता, तथापि बहवो जनाः अनभिज्ञाः। तस्मात् कोऽस्मिन् विषये अधिकारी इत्यत्र वक्तव्यम्। अद्वैतवेदान्तमतानुसारेण कदाचित् सर्वेऽपि अधिकारिणः भवितुम् अर्हन्ति, परन्तु सर्वे न सन्तीति वस्तुस्थितिरियम्। तस्मात् प्रश्नोऽयं तथैव यत् कोऽत्र अधिकारि नाम। अनेकार्था हि शब्दाः इति न्यायेन अधिकारिशब्दस्यापि नैके अर्थाः भवन्ति,तथपि प्रकरणवशादत्र निकषद्वयम् आवश्यकम् इति मन्ये। प्रथमः निकष उपनिषदर्थावगतिः तथा च साधनाभकत्या मोक्षप्राप्तिरिति। प्रयोजनमपि द्विविधं स्यात्, यथा फलस्वरुपभक्तेः प्राप्तिः तथा च साधन भक्तया मोक्षप्राप्तिरिति। उपनिष्ग्रन्थाभ्यासः विषयः। बोध्य वोधकभावसम्बन्धः। अधिकारी अयम् आपाततो अधिगतोपनिषदर्थः। तस्मादुपनिषद्विषये किञ्चिदत्र मन्तव्यम्। उपनिषद्विषयिणी श्रद्धा द्वितीयश्च भक्तेः यथार्थ भानम्।

उपनिषन्नाम गुरु-शिष्ययोः संवादः। कुत्रचित् स संवादः स्पष्टतया उपलभ्यते कवचिच्च अनुमीयते। यथा कठोपनिषदि अथवा प्रश्नोपनिषदि स्पष्टोऽयं संवादः। तथा केनोपनिषदि संवादोऽयं स्यादिति अनुमीयते [१]। सामान्यतया उपनिषत्सु त्रिकतत्त्वज्ञानं दृश्यते। त्रिकं नाम संकलनात्रयम्। भिन्नाः एताः संकल्पनाः काश्मीरशैवदर्शने उपलभ्यमानाभ्यः संकल्पनाभ्यः। उपनिषत्सु विद्यमानाः तिस्रः संकल्पनाः नाम जीवः जगत् तथा च ईश्वरः। प्राचीनेषु एकादशोपनिषत्सु स्ववैशिष्ट्यानुसारम् एतासां तिसृणां संकल्पनानां विचारः विद्यते। भक्तेः कृते जगद्विहाय जीवेश्वरयोः अत्यन्तावश्यकता। अनयोर्द्दयं वर्णनम् आगच्छति मुण्डकोपनिषद् तथैव श्वेताश्वतरोपनिषदि। तद् यथा-

> द्वा सुपर्णा सयुजा सखायौ समानं वृक्षं परिषस्वजाते।
> तयोरेकः पिप्पलं स्वादु अत्ति अनश्ननन्यः अभिचाकशीति।।[२]

जीवेश्वरयोरैक्यमत्र केचन भेदेन सह स्पष्टतया दृश्यते। अतएव केवलद्वैतमतानुसारेण एकमेव ब्रह्म सर्वत्र चकास्ते। इदं निष्फलं निरञ्जनं ब्रह्म एव भक्तस्य ईश्वरः। जीवः ब्रह्म एव किन्तु, अविद्यावशाद् भिन्न इव लक्ष्यते। अतः जीवब्रह्मणेः ऐकयार्थ अस्ति आवश्यकता। अविद्यायाः निराकरणस्य सा कथं निराकर्तव्या। एको ज्ञानमार्गः। का नाम अविद्या इति यथार्थ्येन ज्ञानेन तस्याः मुक्तिः शक्या। व्यवहारेऽपि एवमेव भवति। पदार्थकं ज्ञात्वा, अवगतोऽयमिति मत्वा, वयं पदार्थान्तरं पश्यामः। अत्र तु पदार्थद्वयमेव। अविद्या तथाच अविद्यावान् जीवः। अविद्या अवगता चेद्, अवशिष्यते जीवः। सोऽपि अविद्याविरहितः ब्रह्मत्वेन अवतिष्ठति।सिद्धो भवति केवलाद्वैतसिद्धान्तः। ईदृशोऽयं ज्ञानमार्गः। अपरः कर्ममार्गः। एतद् सूत्ररुपेण आगच्छति ईशोपनिषदि। यथा-

> कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
> एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।।[३]

अस्य कर्मयोगस्य स्पष्टीकरणं विद्यते श्रीमद्भगवद्गीतायाम्। ईश्वरर्पणबुद्धया कर्म कृत्वा मोक्षः कथम् अर्जितव्य इति। योगमार्गः कठिनः इत्यस्मिन् विषये वैमत्यं न स्यादिति मन्ये। योगाचरणस्य कानिचन चिह्नानि तथा च परिणामाः श्वेताश्वतरोपनिषदि प्राप्यन्ते। अवशिष्टस्तु भक्तिमार्गः। तस्मिन् विषये नारदभक्तिसूत्राणि, शाण्डिलभक्ति- सूत्राणि इत्येते नैक ग्रन्थाः वर्त्तन्ते, तथापि

पूर्ववर्तिनि वेदवाङ्मये, तत्रापि तत्त्वज्ञानेन प्रसिद्धासु उपनिषत्सु वर्त्तन्ते वा भक्तेः कोऽपि सन्दर्भः इति कुतूहलं मनसि जायते। यतः उपनिषदिति वेदस्य अन्तिमः भागः। तथापि उपनिषत्सु क्वचिद् वेदाद् भिन्नं दृश्यते। धनं धान्यं बहुपुत्रलाभम् इति वेदेषु विद्यमान प्राथना। किं प्रजाया करिष्यामि इति उपनिषदां पृच्छा तथा च वेदेषु वर्त्तन्ते भक्तियुक्तानि सूक्तानि वर्तते वा तादृशं भक्तेः स्थानम् उपनिषत्सु इत्ययं प्रमुखः प्रश्नः।

भक्तिर्नाम का इत्ययं मूलभूतः प्रश्नः। उपनिषत्सु अथवा पूर्वर्तिनि वेदवाङमये भक्तेः व्याख्या विवरणं वा नोपलभ्यते। परं सूत्रवाङमयकाले यथा सांख्यसूत्राणि, न्यायसूत्राणि, ब्रह्मसूत्राणि, तथैव भक्तिसूत्राण्यऽपि जातानि। भक्तिसूत्राणां प्रसिद्धौ कर्तारौ नारदशाण्डिल्यौ। द्वयोः ग्रन्थयोः नामधेये भक्तिसूत्राणि इत्येव। नारदेन भक्तिः परमप्रेमरुपा अमृतस्वरुपा च[४]। शण्डिल्यः कथयति यद् भक्तिर्नाम अविरोधे न आत्मरतिरिति। नारदेन भक्तेः यत् स्वरुपम् कथितं तत्र परम इति महत्वपूर्णं विशेषणम्। विशेषणमिदं भक्तिप्रेम लौकिकप्रेम्णः भिनन्ति। सापेक्षिकं लौकिकप्रेम। यद्यपि जनाः कथयन्ति यदस्माकम् आत्यन्तिकप्रेम अमुकस्योपरि, तथापि तत्तवत्पर्यंन्तमेव यावत् जनान्तस्य वर्तनं स्वानुकूलं भवति। प्रतिकूले तु (प्रमिके) प्रीतिस्थाने प्रेम अपि प्रतिकूलं भवति। क्वचिच्च क्रोधे परिवर्तते। परन्तु परमप्रेम्णः आलम्बनं नाम साक्षाद् ईश्वररुपं ब्रह्म इति। अतः तत्प्रेम स्थायित्वाच्च अमृतरुपम्। शाशवतम् इति कथयितुं शक्यम्। ब्रह्म शाशवतं जीवः शाश्वतः। तस्मात् द्वयोः शाश्वतपदार्थयोः प्रेम अपि शाश्वतमेव स्यात्। नारदशाण्डिलयोः व्योक्तित्वभेदेऽपि दृश्यते। नारदः भक्तिमान् शाण्डिल्यश्च बुद्धिमान्। भक्तेः सम्वन्धः हृदयेन। बुद्धिस्तु तर्ककर्कशा। तस्मादनवसरः भक्तानां कृते बद्धेः। नारदः भक्तौ प्रम समावेशयति। शाण्डिल्यस्तु आत्मरतिः इत्यमुंशब्दं प्रयुङ्क्त। आत्मारतिर्नाम आत्मरमणं बाह्मासाधनं विना आनन्दावाप्तिः। नारदः भक्तौ प्रेम समावेशयति। शाण्डिलस्तु आत्मरतिः इत्यमुंशब्दं प्रयुङ्कत। आत्मरतिर्नाम आत्मरमणं बाह्मसाधनं विना आनन्दवाप्तिः। तादृशं प्रेम यद्वात्मरतेः विरुद्धं नास्ति सा भक्तिरिति शाण्डिल्यमहर्षेः प्रतिपादनम्।

उपनिषत्सु भक्तिरिति शब्दः परमेश्वरविषयिणी रतिः इत्यनेन अर्थेन एकदा एव आगच्छति। सोऽपि श्वेताश्वतरोपनिषदि षष्ठाऽध्याये अन्तिमे श्लोक। ऋषिः कथयति यद् यो गुरौ तथा देवे अव्यभिचारिणीं भक्तिं करोति, सः सर्वं ज्ञानम् उपलभते। नान्यत्र कुत्रापि भक्ति शब्दस्य प्रोयोगः एकादशोपनिषत्सु। तथापिप्रथमं तावत् सामान्यतया एतद् वक्तुं शक्यं यद् उपनिषत्सु गुरुशिष्ययोः संवादः अस्ति। ययोर्द्वयोर्मध्ये प्रेम वर्तते तयोरेव संवादः शक्यः। गुरोः शिष्यं प्रति प्रम तथा च शिष्यस्य गुरुं प्रति भक्तिरिति तु गृहितकमिव। परम् एतावत्येव भक्तिरत्र नापेक्षिता। अपि च इयं भक्तिस्तु, ग्रामं गच्छन् तृणं स्पृशेद् इतिवद् अवान्तरफलरुपा। प्रधाना भक्तिः जीवब्रह्मणोः। यदि ब्रह्म कर्तुः जीवस्य ईप्सिततमं न स्यात् तार्हि किं कारणं वारवारं ब्राह्मणः वर्णनस्य। तच्च वर्णनं क्वचित् सकारात्मकं क्वचित् नकारात्मकम्। न अपवादभूता एकापि उपनिषद् या ब्रह्म न वर्णयति। यत्प्रेमास्पदं तस्यैव गुणवर्णनं वारवारं भवति इति प्रसिद्धं लोके। अत्रापि ब्राह्मणः परमप्रियत्वमेव कारणं स्यात्।

छन्दोग्योपनिषद् आत्मादेशं कथयति यः कोऽपि आत्मानं लभते स आत्मरतिः आत्मक्रीडः आत्मानन्दःभवति इति। अत्रास्थः प्रतेकः शब्दः महत्वपूर्णः। आत्मरतिः नाम आत्मनि रमणं ब्रह्मं साधनं विना। शक्यमेतत्। नैकवारं कञ्चिकालपर्यन्तं गृहे एकाकिनिः भूत्वा अनुभवामः वयम् एतादृशं रमणम्। किन्तु आत्मक्रिडः तथा च आत्ममिथुनः इति एतौ द्वौ शब्दौ अपरं विना साथौ न भवतः। छान्दोग्यस्थवर्णनस्य प्रतिबिम्बरुपं सूत्र नारदभक्तिसूत्रे आगच्छति यत् – तत्प्राप्य तदेवाव लोके याति, तदेव शरणेति, तदेव भाषयति, तदेव चिन्तयति[५]।

बृहदारणयकोपनिषदि याज्ञवल्क्योऽपि मैत्रेय्यै कथयति- आत्मा वाऽरे द्रष्टव्यः श्रोतव्यः मन्तव्यः निदिध्यासितव्यः[६]। अतः उपनिषत्सु अद्वैतरुपिणी भक्तिः इति मन्ये। भक्तिः अद्वैतरुपिणी कथं स्याद् इत्यस्य उत्तरं ज्ञानेश्वरमहाराजस्य अमृतानुभवे प्राप्यते। महारजः कथयति यदेकमेव पाषणं गृहीत्व। देवालयं, देवं तथाच देवीं निर्माता एवमेव अद्वैतरुपेण भक्तेः व्यवहारः सम्भवति। आत्मा एव भक्तः आत्मा च भगवान् इति। चिन्मयानन्दः नाम विंशतितमे शतके सञ्जातः तत्तज्ञः विषयेऽस्मिन् एवं चिन्तयति यद् उपनिषदः नाम भक्तेः शास्त्रीयग्रन्थाः इति। मन्ये, उपनिषत्सु विद्यमाना अद्वैतरुपिणी भक्तिरेव कालान्तरेण कालानुसारेण च श्रीमद्भगवद्गीतासदृशे स्मृतिग्रन्थे द्वैतरुपिणी सञ्जाता स्याद्।

## References


१. उपनिषदं भो ब्रहीति। उक्ता त उपनिषत्। केन.४.७
२. मुण्डक-३.१.१ । तथाच श्वेता.४.६
३. ईशोपनिषद्-२
४. त्रिरुन्नितं स्थाप्य समं शरीरं हृदीन्द्रियाणि मनसा संनिवेश्य।
५. ब्रह्मोडुपेन प्रतरेत विद्वान् स्रोतांसि सर्वाणि भयावहानि।। श्वता. २.८
६. ना.भू.सू-५५
७. बृहद्-२.४.५
८. अष्टादश उपनिषदः- सम्पादकौ- वि.प्र. लिमये तथा र.द. वाडेकारं प्रकाशकः- वैदिकसंशोधन मण्डलम्। पुणे,१९५८
९. नारदभक्तिसूत्र- स्वामी चिन्मयानन्द, सेंट्रल चिन्मय चिशन ट्रस्ट, मुंबई,१९९८.
१०. शाण्डल्यभक्तिसूत्रम्- मूलमात्रम्।